।। श्रीः ।।

।। श्रीमते निगमान्तमहादेशिकाय नमः ।।



# श्री ब्रह्मतन्त्रपरकालमठीय चक्राङ्कन गुरुपरम्परानुसन्धानक्रमः



श्री ब्रह्मतन्त्रस्वतन्त्रपरकालमठम्

कृष्णविलासमार्गः मैसूरु - ५६० ०२४

।। श्रीः ।।

।। श्रीमते निगमान्तमहादेशिकाय नमः ।।



श्री श्री श्रीमदभिनववागीशब्रह्मतन्त्रस्वतन्त्रपरकालस्वामिपादाः

।। श्रीलक्ष्मीहयवदनलक्ष्मीनारायणाभ्यां नमः ।।

।। श्रीमते रामानुजाय नमः ।।



ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।

।। श्रीमते निगमान्तमहादेशिकाय नमः ।।
श्रीमदभिनव-वागीश-ब्रह्मतन्त्र-स्वतन्त्र-
परकाल-यतीन्द्र महादेशिकाय नमः

अस्मद्गुरुभ्यो नमः। अस्मत्परमगुरुभ्यो नमः। अस्मत्सर्वगुरुभ्यो नमः। श्रीमते वेदान्तगुरवे नमः। श्रीमते रामानुजाय नमः। श्रीमहापूर्णाय नमः। श्रीमद्यामुनमुनये नमः। श्रीराममिश्राय नमः। श्रीपुण्डरीकाक्षाय नमः। श्रीमन्नाथमुनये नमः। श्रीमते शठकोपाय नमः। श्रीमते विष्वक्सेनाय नमः। श्रियै नमः। श्रीधराय नमः।

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णान् मुनिं यामुनम्।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ।।

अस्मद्गुरुसमारम्भां यतिशेखरमध्यमाम् ।
लक्ष्मीवल्लभपर्यन्तां वन्दे गुरुपरम्पराम् ।।

श्रीकृष्णब्रह्मतन्त्रोत्तमगुरुणावाप्तचक्राङ्कभाष्यं
वैराग्याचारवार्धौ वरदपदमुखे लक्ष्मणे न्यस्तभारम्।
श्रीवागीशात्ततुर्यं शठरिपुयतिराड्वेद चूडार्यमूर्तिं
नूत्नं श्रीरङ्गनाथं कलिरिपुमनघं ब्रह्मतन्त्रं श्रयामः ।।

श्रीतुरगवदनपादूसंततपरिचरणमात्रपरमार्थः ।
जयतु श्रीमानभिनवरङ्गेन्द्रब्रह्मतन्त्रपरकालः ।।

श्री कृष्णब्रह्मतन्त्राभिधकलिमथनाल्लब्धचक्राङ्कभाष्यं
नव्य श्रीरङ्गनाथे कलिमथनगुरावर्पितात्मीयभारम् ।
तद्दीक्षालब्धतुर्यं हयवदनपदत्राणसेवाधुरीणं
ध्यायेयं ब्रह्मतन्त्रं कलिमथनगुरुं श्रीनिवासं नवीनम् ।।

श्रीमल्लक्ष्मीहयग्रीवपादुकासेवको वशी ।
जीयान्नव्यश्रीनिवासपरकालगुरूत्तमः ।।

नूत्न श्रीरङ्गनाथाग्रिमपदकलिजिल्लब्धचक्राङ्कन श्री-
त्रय्यन्तद्वन्द्वतत्त्वं तदनघचरणन्यस्तभारं यतीन्द्रात् ।
प्रत्यग्रश्रीनिवासात्समधिगततुरीयाश्रमं संश्रयामः
नव्यं रामानुजाख्यं कलिमथनगुरुं ब्रह्मतन्त्रस्वतन्त्रम् ।।

लक्ष्मीहयास्यपादूवरिवस्यैकान्तमानसस्सततम् ।
जयतु श्रीमदभिनवरामानुजयोगीन्द्रपरकालः ।।

श्रीमन्नूतनरङ्गनाथयतिराडाप्तात्मविद्यालयं
श्रीमन्नूतनलक्ष्मणार्ययतिराट्सम्प्राप्ततुर्याश्रमम् ।
श्रीवासेन्द्रकटाक्षसंततसुधालक्ष्यात्मयोगाञ्चितं
श्रीमन्नूतनवागधीशयमिनं भक्त्याश्रयामोगुरूम् ।।

नव्यवागीशयोगीन्द्र हयास्यपदसेविनम् ।
ब्रह्मतन्त्रस्वतन्त्रार्यं भजामस्स्वात्मसम्पदम् ।।

श्रीमते श्रीलक्ष्मीहयग्रीवदिव्यमणिपादुकासेवक
श्रीमदभिनववागीशब्रह्मतन्त्र स्वतन्त्र
परकालमहादेशिकाय नमः

# मन्त्रजपक्रमः

अच्युताय नमः, अनन्ताय नमः, गोविन्दाय नमः, इति द्विः आचम्य, अष्टाविंशतिवारं आवर्तितेन मूलमन्त्रेण त्रिः प्राणानायम्य ।।

श्रीभगवदाज्ञया श्रीमन्नारायणप्रीत्यर्थं अष्टाविंशतिवारं ।
वा अष्टोत्तरशतवारं वा अष्टाक्षरमहामन्त्रजपं करिष्ये ।।

अस्य श्रीमदष्टाक्षरमहामन्त्रस्य बदरिकाश्रमवासी श्रीमन्नारायण ऋषिः, देवीगायत्रीच्छन्दः, परमात्मा श्रीमन्नारायणोदेवता, अं बीजं, आयश्शक्तिः, मं कीलकम्, श्रीमन्नारायणप्रीत्यर्थे जपे विनियोगः ।। ओं ओं अङ्गुष्ठाभ्यां नमः । ओं नमः तर्जनीभ्यां नमः । ओं नारायणाय मध्यमाभ्यां नमः । ओं ओं अनामिकाभ्यां नमः । ओं नमः कनिष्ठिकाभ्यां नमः । ओं नारायणाय करतलकरपृष्ठाभ्यां नमः । ओं ओं ज्ञानाय हृदयाय नमः । ओं नमः ऐश्वर्यायशिरसे स्वाहा । ओं नारायणाय शक्त्यै शिखायै वौषट् । ओं ओं बलाय कवचाय हुम् । ओं नमः तेजसे नेत्राभ्यां वौषट् । ओं नारायणायवीर्यायास्त्राय फट् - ओं भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम्

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा,
जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे
देवीभूषा दियुक्तो जनयतु जगतां शर्म वैकुण्ठनाथः ।।

**ओं नमो नारायणाय** - इति मन्त्रः ।

पूर्ववत् द्विवारं आचम्य, त्रिः प्राणानायम्य

श्रीभगवदाज्ञया श्रीमन्नारायणप्रीत्यर्थं अष्टाविंशतिवारं
द्वयमन्त्रजपं करिष्ये इति संकल्प्य,

क्षीराम्भोनिधि रत्नमण्टप महासौवर्ण सिंहासने
वामाङ्कस्थितया प्रसन्नवदनं श्रीकान्तयालिङ्गितम् ।
दोर्दण्डाङ्कित शङ्खपङ्कजगदाचक्रैरुदारश्रियं
त्वां नित्यं कलयामि जन्मविमुखो लक्ष्मीश नारायण ।

इति ध्यात्वा

**श्रीमन्नारायणचरणौ शरणं प्रपद्ये ।**

**श्रीमते नारायणाय नमः ।।**

इति मन्त्रं पूर्ववत् संख्यायुक्तं जपेत् ।।

ततः पूर्ववत् आचम्य
प्राणानायम्य श्रीभगवदाज्ञया
श्रीमन्नारायणप्रीत्यर्थं

पूर्ववत् संख्यान्वितं चरमश्लोक मन्त्रजपं करिष्ये

यत्प्रपत्तिं विना सर्वैर्यस्य माया दुरत्यया ।
धनञ्जय रथस्थं तत् प्रपद्ये शरणं महः ।।

इति ध्यात्वा,

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।**
**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।**

श्रीम् श्रियै नमः

इति चरमश्लोक मंत्रं यथाशक्ति जपेत् ।।